This Question Paper consists of 42 questions and 8 Printed pages.
अस्मिन् प्रश्नपत्रे 42 प्रश्नाः एवम् 8 मुद्रित पृष्ठाः सन्ति ।

**Sl. No.**

| Roll No. अनुक्रमाङ्क | | | | | | | | | | | | | Code No. कोड नं. | 63/S/A/S |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|

Set /सेट **A**

# SANSKRIT

# संस्कृतम्

# (209)

Day and Date of Examination
(परीक्षादिवसः दिनाङ्कश्च) ____________________

Signature of Invigilators 1. ____________________
(निरीक्षकयोः हस्ताक्षरम्)

2. ____________________

**सामान्य अनुदेशा :**

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः ।
2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति । प्रश्नाः क्रमानुसारमेव सन्ति ।
3. वस्तुनिष्ठप्रश्नेषु (A), (B), (C) वा (D) विकल्पेषु कोऽपि एकम् उत्तरं चित्वा पृथक्रूपेण प्रदत्ते उत्तर–पुस्तिकामध्ये लिखेत् ।
4. वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि ।
5. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति ।
6. स्व–उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट (कोड) संख्या **63/S/A/S-Set-A** अवश्यं लेखनीया ।



Unnati Educations
9899436384, 9654279279

# SANSKRIT

# संस्कृतम्

# (209)

समय : होरात्रयम्] [पूर्णाङ्काः : 100

**निर्देशाः** (1) अस्मिन् प्रश्नपत्रे द्विचत्वारिंशत् प्रश्नाः सन्ति ।

(2) प्रत्येकम् प्रश्नस्य समक्षम् अङ्काः सूचिताः ।

(3) सर्वे प्रश्नाः अनिवार्याः ।

---

## खण्ड–क

**1.** बोपदेवः पाठ्यविषयाणाम् अवबोधनेनितान्तम् ............ आसीत् । **[1]**

(A) तीव्रः (B) समर्थः

(C) असमर्थः (D) मन्दः

**2.** वृक्षे कीदृशः वानरः वसति स्म ? **[1]**

(A) कृष्णः (B) भयंकरः

(C) बलिष्ठः (D) दुर्बलः

**3.** प्राणादयः कम् एत्य अपृच्छन् ? **[1]**

(A) विष्णुम् (B) प्रजापतिम्

(C) महेशं (D) दैवज्ञम्

**4.** अरक्षितं ............. तिष्ठति । **[1]**

(A) दैवहतं (B) दैवरक्षितम्

(C) दैवविसर्जितम् (D) दैवभक्षितम्

**5.** शक्रस्य ........... सर्वलोकेषु व्याप्ता आसीत् । **[1]**

(A) लक्ष्मीः (B) कीर्तिः

(C) भीतिः (D) रीतिः



Unnati Educations
9899436384, 9654279279

6. सूर्यग्रहणकाले सूर्यं ........... छादयति। [1]

(A) पृथ्वी (B) भूच्छाया

(C) ग्रहगतिः (D) शशी

7. अशक्तैः बलिनः शत्रोः किं कर्त्तव्यम्? [1]

(A) अनुसंधानम् (B) आह्वानम्

(C) आश्रयणम् (D) प्रपलायनम्

8. 'छात्राः सर्वान् विषयान् अवगच्छन्ति' इत्यत्र 'अवगच्छन्ति' क्रियापदे कः लकारः? [1]

(A) लङ् (B) लट्

(C) लृट् (D) लोट्

9. प्राणादयः पितरं गताः 'अत्र' पितरम् इति पदस्य मूल शब्दः कः? [1]

(A) फिदृ (B) पीतरि

(C) पितृ (D) पितर

10. रिक्तस्थाने किं भविष्यति? 'ज्ञातव्याः षट् शुनः ..........'। [1]

(A) दोषाः (B) गुणाः

(C) आहाराः (D) आचाराः

11. रामः सुग्रीवेण सह कस्मिन् पर्वते अमिलत्? पर्वतः कीदृशः आसीत्? [1 + 1 = 2]

12. (i) केभ्यः भीता सुरेंद्रवाहिनी पलायनम् अकरोत?

(ii) संन्यासिनः कुत्र विचरन्ति?

[1 + 1 = 2]

13. (i) शांतिप्रियः शक्रः किमर्थं युद्धाय तत्परोऽभवत्?

(ii) करालमुखनामकः मकरः कम् अपश्यत्?

[1 + 1 = 2]



Unnati Educations
9899436384, 9654279279

14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत – [3 × 1 = 3]

शकुन्तला – (सलज्जम्) तात ! वन्दे ।

कण्वः – वत्से ! भर्तुः बहुमताभव । सम्राजं सुतम् आप्नुहि

गौतमी – भगवन् ! वरः खलु एषः न आशीः ।

कण्वः – वत्से ! इतः अग्निं प्रदक्षिणीकुरुष्व । एतेवह्नयः दुरितम् अपघ्नन्तः त्वां पावयन्तु । प्रतिष्ठस्व इदानीम् ।

प्रश्नाः –

(i) शकुंतला कं प्रणमति ?

(ii) कण्वः कीदृशं सुतं प्राप्तुं शकुन्तलाम् आशीर्वदति ?

(iii) वह्नयः की पावयन्तु ?

15. कस्य चिदेकस्य चरित्रचित्रणं पंचवाक्येषुसंस्कृतेन कुर्वन्तु – [1 × 5 = 5]

लवः अथवा चन्द्रकेतुः ।

16. प्रश्नान् उत्तरत – [1 + 1 = 2]

(i) सर्वेषां गुणानाम् आधारः कः अस्ति ?

(ii) पम्पातरे रामः काम् अपश्यत् ?

17. (i) अनन्तकः व्याधिः कः ?

(ii) 'गीताञ्जलिः' कस्यकवेः कृतिः अस्ति ?

[1 + 1 = 2]

18. ततस्तीरे सबर्मत्या नाम्ना सत्याग्रहाश्रमः ।

महात्मा स्थापयामास सदनं सानुयात्रिकः ।। [1 + 1 = 2]

(i) कस्याः नद्याः तीरे सत्याग्रहाश्रमः अस्ति ?

(ii) आश्रमं कः स्थापयामास ?

19. घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवा : ।

घृतनद्यो घृतावर्तास्ता में सन्तु सदा गृहे ।। [1 + 1 = 2]

(i) गावः किं–किं प्रददति ?

(ii) गावः सदा कुत्र सन्तु ?

20. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत – [3 × 1 = 3]

सार्थः प्रवसतो मित्रं भार्या मित्रं गृहे सतः ।

आतुरस्य भिषङ् मित्रं, दानं मित्रं मरिष्यतः ।।

(i) गृहेवसतः मित्रं किम् ?

(ii) भिषक् कस्य मित्रम् ?

(iii) दानम् कस्य मित्रम् ?



Unnati Educations
9899436384, 9654279279

**21.** निम्नलिखित श्लोकस्य अन्वये रिक्त स्थान पूर्तिं कुरुत – **[3 × 1 = 3]**

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते आयुर्विद्यायशोबलम् ।।

अन्वयः – .............. अभिवादनशीलस्य वृद्धोपसेविन :
तस्य ............. आयुः विद्या यशः बलम् ...............।

**22.** रेखांकितपदमाधृत्य प्रश्न निर्माणं कुरुत – **[1 + 1 = 2]**

(i) दौवारिकः प्रभुवर्यस्य आदेशं पालयति ।

(ii) दौवारिक : संन्यासिनम् दुर्गाध्यक्षसमीपे नेतुम् इच्छति ।

**23.** कः कम्प्रति कथयति? **[1 + 1 = 2]**

(i) अहो, बहुमत्स्योऽयं ह्रदः कदाचिदपि न अस्माभिरन्वेषितः ।

(ii) अहो, श्रुतं भवद्भिः यत् मत्स्यजीविभिः अभिहितम् ।

**24.** (i) अभ्यंगः किं–किं करोति?

**[1 + 1 = 2]**

**25.** अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत **[3 × 1 = 3]**

यद्यपि चंदनविटपो विधिना फलकुसुमविवर्जितो विहितः ।
निजवपुषैव परेषां तथापि सन्तापमाहर ति ।।

(i) फलकुसुम विवर्जितः कः विटपः?

(ii) सः जनानां सन्तापं केन हरति?

(iii) साधनरहितः जनः केन सहायतां करोति ।

**26.** अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत – **[3 × 1 = 3]**

ध्यायन् क्लेशान् स्वबंधूनां तद्धितैक परायणः ।
विराजते मुनिर्बुद्धो बोधिद्रुमतले यथा ।।

(i) सत्याग्रहाश्रमे मुनिः कः आसीत्?

(ii) सः आश्रमे केषां क्लेशान् ध्यायन् अतिष्ठत्?

(iii) गांधिनः तुलना अत्रकेन कृता?

**27.** कस्यचिदेकस्य पाठस्य सारांशं पंचवाक्येषु लिखत – **[1 × 5 = 5]**

(i) त्याज्यं न धैर्यम्

(ii) करुणापरा हि साधवः

(iii) प्राणस्य श्रेष्ठत्वम् ।



Unnati Educations
9899436384, 9654279279

## खण्ड – ख

## (अनुप्रयुक्तव्याकरणम्)

**28.** अधोलिखितेषु तालव्यवर्णद्वयं चित्वा लिखत – [1 + 1 = 2]

क, च, श, स, ग

**29.** रेखांकितपदेषु संधिच्छेदं कृत्वा संधिनाम लिखत – [1 × 3 = 3]

देवागारे पिहित द्वारे तमो वृतेऽस्मिन् भजसे कम्?

त्यज जपमालां त्यज तव गानंनास्त्यत्रेशः स्फुटय दृशम् ।।

**30.** सन्धिं कुरुत – [1 + 1 = 2]

सिंहात् + एकम् । अत्र + आगत्य ।

**31.** रेखांकितपदयोः कः मूलशब्दः का च विभक्तिः? [1 + 1 = 2]

माता भूमिः पुत्रोऽहं पृथिव्याः ।

**32.** रिक्तस्थानेषु अंकानां स्थाने संख्यावाचकानि पदानि लिखत – [3 × 1 = 3]

(i) ___2___ एतौ सुखमे घेते ।

(ii) ___3___ मत्स्यजीविनः आगमिष्यन्ति ।

(iii) ___3___ फलानि तत्र सन्ति ।

**33.** रेखांकित पदयोः कः धातुः कश्च लकारः? [1 + 1 = 2]

(i) ततः प्रविशति कश्यपः ।

(ii) सर्वे ग्रहाः परितः भ्रमन्ति ।

**34.** रेखांकितपदयोः कः मूलशब्दः का च विभक्तिः? [1 + 1 = 2]

लक्ष्मीः तस्य हृदयं दर्पभलिनं नाकरोत् ।

**35.** अधोलिखितयोः समस्त पदयोः विग्रहं लिखत – [1 + 1 = 2]

शान्ति प्रियः । जलाशयः ।

**36.** अधोलिखित विग्रहाणां कृते समस्तपदं लिखत – [1 + 1 = 2]

रामस्य पश्चात् । स्वेदजलेन आर्द्रः ।



Unnati Educations
9899436384, 9654279279

**37.** रिक्तस्थाने किं पदं भविष्यति? [1 + 1 = 2]

(i) सः द्वादशशताब्द्यां ............ । (जन् + क्त)

(ii) त्वं फलं ............. आगच्छ । (नी + क्त्वा)

**38.** रिक्तस्थान पूर्तिं कुरुत – [3 × 1 = 3]

(i) वृत्तं ........... संरक्षेत् । (यत्न)

(ii) ........... परं पदं नास्ति । (सत्य)

(iii) कूपसमीपे ......... शिलाखण्डः आसीत् । (विशाल)

## खण्ड–ग

## (रचनाकौशलम्)

**39.** अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्त प्रश्नान् उत्तरत – [5 × 1 = 5]

प्रातःकालस्य समयः सुरभ्यः भवति । विविधवर्णानां खगानां मधुरगानं चित्तं प्रसादयति । शीतलः मंदवायुः बलंवर्धयति । येजनाः सूर्योदयात् पूर्वम् उत्तिष्ठन्ति ते स्वस्थाः चिरजीविनः भवन्ति । कोकिलस्वरः मनोहरति । पुष्पाणाम् सुगन्धिः मस्तिष्कम् आमोदयति । हरित तृणानि नेत्राणि शीतयन्ति । प्रातः भ्रमणम् अवश्यं कर्त्तव्यम् ।

प्रश्नाः

(i) कः समयः सुरभ्यः भवति?

(ii) तदा खगाः कीदृशं गानं कुर्वन्ति?

(iii) 'मंदवायुः' इति पदस्य विशेषणम् किम्?

(iv) 'कुसुमानाम्' इत्यर्थे अत्र अनुच्छेदे कः शब्दः प्रयुक्तः?

(v) खगाः कीदृशाः सन्ति?

**40.** अधोलिखित विषयमधिकृत्य मञ्जूषा–पद–सहायतया एकम् अनुच्छेदं लिखत – [1 × 5 = 5]

अहिंसा

| **मञ्जूषा** |
|---|
| हिंसायाः परित्यागः मनसा कर्मणा वाचा पालनम् अहिंसायाः अहिंसकः धर्मशास्त्रेषु महत्त्वम् धर्मस्य लक्षणे प्रथमे स्थाने महर्षय सदा अहिंसकाः दयावन्तः महात्मा गांधी अहिंसाबलेन देशं स्वतंत्रम् अकरोत् परमः धर्मः । |



Unnati Educations
9899436384, 9654279279

**41.** भवान् प्रियव्रतः । शिक्षकदिवसस्य अवसरे भवान् विद्यालये शिक्षकरूपेण पाठितवान् । तत् सूचयन् स्वपितरं पत्रमेकं मञ्जूषायां प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा लिखतु । [1 × 5 = 5]

जबलपुरतः

तिथिः

आदरणीयाः पितृचरणाः

सादरं प्रणामाः ।

अद्य शिक्षकदिवसे अस्माकं ____(i)____ अहं शिक्षकः भूत्वा पाठितवान् । अस्मिन् ____(ii)____ भवतां ____(iii)____ कामये । भवताम् ____(iv)____ मम ____(v)____ सर्वदा भवेत् इति

भवतां पुत्रः

प्रियव्रतः

| मञ्जूषा | | | | |
|---|---|---|---|---|
| विद्यालये | कृपा | पवित्रदिने | आशीर्वादं | उपरि |

**42.** अधोलिखितं चित्रं दृष्ट्वा मञ्जूषा पदसहायतया पञ्च वाक्यानि संस्कृतेन लिखत – [5 × 1 = 5]



**मञ्जूषा**

पुस्तकालये, पुस्तकानि छात्राः पठन्ति ध्यानेन मौनेन कोलाहलः वर्जितः समाचार पत्राणि कथा पुस्तकानि केऽपि रुच्यनुसारं गृहे पठनाय गृह्णन्ति ।

⌘⌘⌘



Unnati Educations
9899436384, 9654279279